# गणेशाष्टकम्

Exported from ambuda.org on 2025-12-23 05:04:09 UTC

1

यतोऽनंतशक्तेरनन्ताश्चजीवा यतो निर्गुणादप्रमेया गुणास्ते ।यतो भाति सर्वं त्रिधा भेदभिन्नं सदा तं गणेशं नमामो भजामः १

2

यतश्चाविरासीज्जगत्सर्वमेतत्तथान्जासनो विश्वगो विश्वगोप्ता तथेंद्रादयो देवसंघा मनुष्याः सदा तं गणेशं नमामो भजामः ॥२॥

3

यतो वह्निभानू भवो भूर्जलं च यतः सागराचंद्रमा व्योम वायुः ।यतः स्थावरा जंगमा वृक्षसंघाः सदा तं गणेशं नमामो भजामः ॥३॥

4

यतो दानवाः किन्नरा यक्षसंघा यतश्चारणा वारणाः श्वापदाश्च यतः पक्षिकीटा यतो वीरुधश्च सदा तं गणेशं नमामो भजामः ॥४॥

5

यतो बुद्धिरज्ञाननाशो मुमुक्षोर्यतः संपदो भक्तसंतोषिकाः स्युः।यतो विघ्ननाशो यतः कार्यसिद्धिः सदा तं गणेशं नमामो भजामः ॥ ५॥

6

यतः पुत्रसंपद्यतो वाञ्छितार्थो यतोऽभक्तविघ्नास्तथाऽनेकरूपाः यतः शोकमोहौ यतः काम एव सदा तं गणेशं नमामो भजामः । ६।

7

यतोऽनंतशक्तिः स शेषो बभूव घराधारणेऽनेक रूपे च शक्तः ।यतोऽनेकधा स्वर्गलोका हि नाना सदा तं गणेशं नमामो भजामः ॥ ७ ॥

8

यतो वेदवाचो विकुंठा मनोभिः सदा नेति नेतीति यत्ता गृणंति ।परब्रह्मरूपं चिदानंदभूतं सदा तं गणेशं नमामो भजामः ॥ ८॥

9

पुनरूचे गणाधीशः स्तोत्रमेतत्पठेन्नरः ।त्रिसंध्यं त्रिदिनं तस्य सर्वकार्ये भविष्यति ॥ ६९ ॥

10

यो जपेदष्टदिवसं श्लोकाष्टकमिदं शुभम् ।अष्टवारं चतुर्थ्यो तु सोऽष्टसिद्धीरवाप्नुयात् ॥ १० ॥

11

यः पठेन्मासमात्रं तु दशवारं दिनेदिने ।स मोचयेद्बन्धगतं राजवध्यं न संशयः ॥ ११ ॥

12

विद्याकामो लभेद्विद्यां पुत्रार्थी पुत्रमाप्नुयात् ।वांछितॉंल्लभते सर्वानेकविंशतिवारतः ॥ १२ ॥

यो जपेत्परया भक्त्या गजाननपरो नरः ।एवमुक्त्वा ततो देवश्चांन्तर्धानं गतः प्रभुः ॥ १३ ॥